## अजाविभ्यां थ्यन। (८/१६६९)

अज अवि इत्येताभ्यां[1] थ्यन् प्रत्ययो भवति तस्मै हितम् इत्येतस्मिन् [2]विषये। छस्यापवादः। [3]अजथ्या [4]यूथिः। अविथ्या॥

## आत्मन्विश्वजनभोगोत्तरपदात् खः। (९/१६७०)

आत्मन् विश्वजन इत्येताभ्यां[5] भोगोत्तरपदाच्च प्रातिपदिकात् खः प्रत्ययो भवति तस्मै हितम् इत्येतस्मिन् [6]विषये। छस्यापवादः। आत्मन्निति नलोपो न कृतः प्रकृतिपरिमाण[7]ज्ञापनार्थम्। तेनोत्तरपदग्रहणं [8]भोगशब्देनैव सम्बध्यते, न तु प्रत्येकम्। आत्मने हितम् [9]आत्मनीनम् (पै. ५.१४.८)। 'आत्माध्वानौ खे' (६.४.१६९/१६७१) इति [10]प्रकृतिभावः। विश्वजनेभ्यो हितम् [11]विश्वजनीनम्। कर्मधारयादेवेष्यते। [12]षष्ठीसमासाद् बहुव्रीहेश्च [13]छ एव भवति। [14]विश्वजनाय हितम् विश्वजनीयम्।

[४९५] पञ्चजनादुपसङ्ख्यानम्। (म. भा. २.३४०)

पञ्चजनाच्च खः। अत्रापि [15]कर्मधारयाद् इष्यते। [16]पञ्चजनीनम्। अन्यत्र पञ्चजनीयम्।

[४९६] सर्वजनाट्[17]ठञ् खश्च। (म. भा. २.३४०)

सार्वजनिकम्, सर्वजनीनम्। अत्रापि [18]कर्मधारयादेव। सर्वजनीयम् [19]अन्यत्र।

[४९७] महाजनान्नित्यं ठञ् वक्तव्यः। (म. भा. २.३४०)

[20]महाजनाय हितम् [21]माहाजनिकम्। [22]तत्पुरुषादेव। [23]बहुव्रीहेस्तु छ एव भवति। महाजनीयम्[24]।

भोगोत्तरपदात् खल्वपि – [25]मातृभोगीणः। पितृभोगीणः। भोगशब्दः शरीरवाची। केवलेभ्यो मात्रादिभ्यः छ एव भवति। [26]मात्रीयम्। पित्रीयम्।

[४९८] राजाचार्याभ्यां तु नित्यम्। (म. भा. २.३४०)

भोगोत्तरपदाभ्यामेव [27]खः प्रत्ययः इष्यते, न केवलाभ्याम्। [28]राजभोगीनः।

[४९९] आचार्यादणत्वं च। (म. भा. २.३४०)

[29]आचार्यभोगीनः। केवलाभ्यां वाक्यमेव भवति, राज्ञे हितम्, आचार्याय हितम् इति॥

---

1. शब्दाभ्याम् इत्यधिकम् ब. 2. अर्थे क. फ. ह. 3. अजाय हिता इत्यधिकम् क. 4. यूतिः क, पूतिः ब. 5. शब्दाभ्यां इत्यधिकम् ब. फ. 6. अर्थे ग. ह. फ, इत्यत्रार्थे क. 7. °ज्ञापनार्थः ह. फ, °परिमाणार्थः क. 8. भोगनैव ह. 9. आत्मनीयः ह, आत्मनीयम् फ. 10. प्रकृतिवद्भावः क, इति नास्ति फ. 11. विश्वजनीनः ह. 12. षष्ठीसमर्थात् ह. 13. छप्रत्ययः फ. ह. 14. विश्वजनेभ्यः हितम् ब. 15. कर्मधारयः एव क. 16. पञ्चजनाय हितम् इत्यधिकम् ह. 17. खश्च चकाराट् ठञ् च ब. फ. ह. 18. कर्मधारया-दित्येव क. 19. अन्यत् मुद्रितः पाठः 20. महाजनान्नित्यं ठञ् प्रत्ययो भवति इति वक्तव्यम् इत्यधिकम् ह. 21. माहाजनिकः माहाजनिकी क. 22. अत्र इत्यधिकम् क. 23. षष्ठीसमासात् इत्यधिकम् क. 24. अन्यत् इत्यधिकम् ह 25. मातृभोगीणम् पितृभोगीणम् ह. 26. मात्रियम् पित्रियम् ब. ह, मात्रियः पित्रियः फ. 27. खः नास्ति ह. 28. राजभोगिणः आचार्यभोगिनः ह, राजभोगीणः ब. क. 29. आचार्यभोगीणः क.